# धर्मशास्त्रवाङ्मयस्य एकमवलोकनम्

**मैत्रेयी गोस्वामी**
सहायकाचार्या संस्कृतधर्मशास्त्रविभागः
कुमारभास्करवर्मसंस्कृत-पुरातनाध्ययनविश्वविद्यालयः
Email: maitreyee.sarma87@gmail.com

**शोधसारः**

वेदानुमापकत्वेनैव धर्मशास्त्रस्य प्रामाण्यम् । समाजशास्त्रत्वेन अस्य प्रसिद्धिः सर्वविदिता अस्ति। समयानुसारं सामाजिकपरिस्थितिम् अभिलक्ष्य महर्षिभिः शास्त्रस्यास्य प्रणयनं विहितम्। सामाजिकी व्यवस्था एव शास्त्रस्यास्य प्रमुखमुद्देश्यम्। धर्मप्रतिपादकं शास्त्रं धर्मशास्त्रम्। अस्य प्रमुखप्रतिपाद्यविषयो भवति धर्मः। धर्मो हि भारतीयसंस्कृतेः मूलाधारः। महानद येन समुद्राश्रितं भवति तदैव भारतीयसंस्कृतिरपि धर्ममूलका अस्ति। अर्थात् धर्मज्ञानं विना शास्त्रस्यास्याध्ययनं सर्वथा व्यर्थमेव। अतः सर्वादौ शास्त्राध्ययनात् पूर्वमेव तदर्थज्ञानं कर्तव्यम्। सामाजिकस्थितिसुदृढये शास्त्रस्यास्य नितान्तमावश्यकमस्ति। समाजे जनाः कथं सुभगं सुखितजीवनयापनं कुर्वन्ति तदर्थं शास्त्रेऽस्मिन् विविधनियमाः वेदाधारेण प्रणीताः सन्ति। समयानुसारं सामाजिकस्थितिं परिलक्ष्य लोकानां कृते नियमप्रणयनमेव शास्त्रस्यास्य परमं लक्ष्यमभवत्। अतः सर्वादौ शास्त्रस्यास्य कीदृशं स्वरूपं, कश्च तस्य प्रतिपाद्यविषयः, कै च तत्र विभागाः सन्ति अवश्यमेव ज्ञातव्यम्।

**कूटशब्दाः** धर्मशास्त्रम्, धर्म, महर्षिभिः|

**प्रस्तावना**

धर्मशास्त्रं भारतीयशास्त्रेषु अन्यतमम्। भारतीयपरम्परायाम् अस्य शास्त्रस्य बहुप्रकारेण प्राशस्त्यमस्ति। 'धृ' – धारणे इति धातोः व्युत्पन्नः। प्रसिद्धमहाभारतग्रन्थेनापि "धारणाद्धर्म इत्याहुः धर्मो धारयते प्रजाः" इति यदुपवर्णितं तद् धर्मस्य यथार्थस्वरूपं संक्षेपेण प्रतिपादयति। धर्मः समाजस्य धारणं नाम संरक्षणं संवर्धनं च करोति, अर्थात् समाजकल्याणकारिणीं कर्माणि जीवनयापनपद्धत्यादि निर्दिशति। धर्मशब्दः प्रथमतया ऋग्वेदे परिदृश्यते। अस्मिन् 'धर्मः' इत्यनेन धर्मार्थविधिः, व्रतम्, संयमः, नियमादि, आचारादि अर्थेषु प्रयुक्तः अस्ति।

ऋग्वेदानुसारेण धर्मशब्दस्यार्थः-

यज्ञेन यज्ञमयजन्त देवास्तानि धर्माणि प्रथमान्यासन्।

ते ह नाकं महिमानः सचन्त यत्र पूर्वे साध्याः सन्ति देवाः॥[1]

पितुं न स्तोषं महो धर्माणं नविषीम्।
यस्य त्रितो व्योजसा वृत्रं विपर्वमर्दयत्॥[2]

यजुर्वेदेनापि धर्मशब्दस्यार्थः - यज्ञप्रतिपादकमस्ति। पुनः –

यतो यतः समोहसे ततो नो अभयं कुरु।
शं नः कुरु प्रजाभ्योऽभयं नः पशुभ्यः॥[3]

धर्मशास्त्रं नाम सकलशास्त्रपुरस्कृतं निखिललोकसुरक्षकं कृत्याकृत्यविवेकप्रतिपादनत्वेन वेदोक्तप्रमाणभूतं तपः-स्वाध्याय-पवित्रचरित्राणां-यम-नियम-अनुष्ठान-निष्ठावतां, सकलभूतहिताय रागद्वेषस्वार्थहितानां मनु-गौतम-वसिष्ठादीनाम् अनवरतस्वाध्यायाध्ययनपूर्तं परमपवित्रं गुणिगणसमादरणीयं सर्वजनग्रहणीयं प्राचीनतमं शास्त्रम्। अस्यैव धर्मशास्त्रस्य अपराभिधानमस्ति 'स्मृतिशास्त्रम्'।यथाह मनुः-

श्रुतिस्तु वेदो विज्ञेयो धर्मशास्त्रं तु वै स्मृतिः।
ते सर्वार्थेष्वमीमांस्ये ताभ्यां धर्मो हि निर्बभौ॥[4]

'धर्मशास्त्रं' इत्यनेन धर्मः शब्दस्यार्थः प्रतिपादकः, शास्त्रश्च भवति प्रतिपादकम्। धर्मः यस्मिन् शास्त्रे प्राधान्येन निर्दिश्यते तदेव शास्त्रं धर्मशास्त्रनाम्ना यद्यपि अभिधीयते, तथापि 'धर्मशास्त्रं तु वै स्मृतिः' इत्यनेन मनुना स्मृतिरूपग्रन्थस्य मुख्यतया धर्मशास्त्रत्वं संकेतितम्। तैत्तिरीयोपनिषदि अपि उक्तमस्ति – "सत्यं वद। धर्मं चर।"[5]याज्ञवल्क्येनापि – "श्रुतिः स्मृतिः सदाचारः स्वस्य च प्रियमात्मनः। सम्यक् संकल्पजः कामो धर्ममूलमिदं स्मृतम्॥"[6] महाभारते अपि उद्धृतमस्ति –

"धारणाद्धर्म इत्याहुः धर्मो धारयते प्रजाः।
यत् स्याद्धारणसंयुक्तः स धर्म इति निश्चयः॥"[7]

गीतायामपि – "स्वधर्मे निधनं श्रेयः परधर्मो भयावहः॥"[8] दार्शनिकजैमिनिमतेन धर्मस्य निरूपणं –

---

1 . ऋग्वेदः, १.१६४.५०
2 . ऋग्वेदः, १.१८७.१
3 . यजुर्वेदः, ३६/२२
4 . मनुस्मृतिः,२/१०
5 . शीक्षावल्ली, १/११/१२
6 . याज्ञवल्क्यस्मृतिः, १/७
7 . महाभारतम्, कर्णपर्व, ४९
8 . श्रीमद्भागवद्गीता,३/३५

"बोधनालक्षणोऽर्थो धर्मः"[9] इति कृतमस्ति। वैशेषिकसूत्रेणापि – "अथातो धर्मं व्याख्यास्यामः।"[10] एवमेव 'ध्रियते अनेनेति धर्मः', 'धर्मे सर्वं प्रतिष्ठितम्', 'धारणात् धर्ममित्याहुः', 'धर्मो धारयते प्रजाः' इत्याद्या उक्तयो धर्मस्य व्यापकत्वं प्रयोजनं च द्योतयन्ति।

**धर्मशास्त्रस्य स्वरूपसामान्यम्**

"धारणाद्धर्म इत्याहुः धर्मो धारयते प्रजाः।
यः स्याद्धारणसंयुक्तः स धर्म इति निश्चयः॥"[11]

इति महाभारतवचनानुसारं धर्मो भवति धारकः जनानां पालकश्च। ध्रियते लोक अनेन इति धर्मः, धरति धारयति वा लोकमिति धर्मः। ध्रियते लोकः यान्नानिर्वाहार्थं वेति धर्मः। 'धृ' धारणपोषणयोस्त्रिस्माद्धातोः मनु प्रत्यये कृते धर्मः, 'शास्' धातोः 'ष्ट्रञ्'-प्रत्यये कृते च शास्त्रमिति पदं निष्पद्यते। धर्मशास्त्रेति व्युत्पत्त्या धर्मशास्त्रपदं सिद्ध्यति।

शास्त्रेऽस्मिन् धर्मार्थकाममोक्षाणां चतुर्वर्गस्य निरपेक्षविचारः परिलक्ष्यते। तेषु चतुर्वर्गपरिगणितपुरुषार्थेषु यः प्रथमः पुरुषार्थः स 'धर्मः'। एवं तस्य प्राथम्यं सर्वसम्पत्तम्। अर्थकामयोर्धर्ममूलकत्वेन धर्मशास्त्रग्रन्थेष्वर्थकामावपि सम्यगेव निरूपितौ।

मुख्यतया शास्त्रेऽस्मिन् आचार-व्यवहार-प्रायश्चित्तानां वर्णनं परिदृश्यते। आचारभागे वर्णधर्म, आश्रमधर्म, गार्हस्थ्याश्रमधर्म, वानप्रस्थाश्रमधर्म, गुणधर्म, निमित्तिधर्म, साधारणधर्म इत्यादयः निरूपिताः। व्यवहारे तु अभिषेकादिगुणस्य राजधर्मः, राज्ञः प्रजापरिपालनमित्यादयः वर्णिताः। प्रायश्चित्ते तु विहिताकरणप्रतिषिद्धसेवनमिति तस्य नैमित्तिकधर्मस्यान्तर्भावो भवति। तत्रादौ आचार एव भारतीयधर्मस्य मूलाधारभूतः। व्यक्तिविकासः समाजस्य च उन्नतिः आचारात् एव भवति। तदेव आचारशब्दः सदाचाररूपेण आख्यातः। यथोक्तं मनुना –

"वेदः स्मृतिः सदाचारः स्वस्य च प्रियमात्मनः।
एतच्चतुर्विधं प्राहुः साक्षाद्धर्मस्य लक्षणम्॥"[12]

'आचारः परमो धर्मः' इति वचनमिदं स्मृतिषु, पुराणेषु, उपपुराणेषु च प्रतिपादितमस्ति। आचाराद् विप्रः परित्यक्तो न अभीष्टं फलं लभेत्। आचारयुक्तजनाः सर्वमभीष्टसिद्धिं कुर्वन्ति।

"आचाराद्विग्युतो विप्रो न वेदफलमश्नुते।

9 . वैशेषिकसूत्रम्, १/१/२

10 . वैशेषिकसूत्रम्, १/१/१/१

11 . महाभारतम्, कर्णपर्वः, ४९

12 . मनुस्मृतिः, २/१२

आचारेण तु संयुक्तः सम्पूर्णफलभाग् भवेत्॥"[13]

धर्मोऽखिलजगतः प्राणस्वरूपात्मकः। लोके धर्मिष्ठं प्रजा उपसर्पन्ति। धर्मे सर्वं प्रतिष्ठितमस्ति। तस्मात् धर्मं परमं वदन्ति। अस्माकं भारतीयाः सनातनधर्मं प्रति विश्वसन्ति। तदनुसारं वेद एव हिन्दुसंस्कृतेः प्राचीनप्रमाणरूपेण स्वीकृतः। भारतीयाः वेदानामुपरि दृढविश्वासवन्तः आसन्। यतः सोऽयं धर्मो वेदप्रतिपाद्यः इति वेद एव सर्वस्य प्राणभूतः। वैदिककाले नराः यज्ञैर्देवान् सन्तोष्य धर्ममार्गे आसन्। अतः तस्मिन् समये यज्ञ एव मुख्यधर्म आसीत्।

तस्मात् परं वेदस्य परमप्रामाण्यं सर्वैः स्मृतिकारैर्मन्वादिभिरपि स्वीकृतमस्ति। तदनन्तरं च स्मृतयः वेदमूलकत्वेन धर्मप्रामाण्यमधिकुर्वन्ति। ज्योतिषतत्त्वे उक्तमस्ति – 'स्मृतिस्तु धर्मसंहिता' इत्यभरः।

ऋग्वेदे धर्मशब्दः प्रायशः धारणार्थं पालनार्थं च पुल्लिङ्गे एव प्रयुक्तः –

क) इममञ्जस्यामुभये अकृषवत् धर्माणामनि विदथस्य साधनम्।[14]

ख) त्वे धर्माण आसते जुहुभिः सिश्चतीरिव।[15]

यजुर्वेदे धर्मशब्दः धारणार्थं धारकार्थं च दृश्यते । वेदेऽपि बहुषु स्थलेषु धार्मिकविधिषु क्रियासंस्कारेषु च धर्मशब्दः नपुंसकलिङ्गेऽपि प्रयुक्तः –

क) त्रीणि पदा विचक्रमे विष्णुर्गोपा अदाभ्यः। अतो धर्माणि धारयन्।[16]

ख) तानि धर्माणि प्रथमान्यासन्।[17]

अथर्ववेदे धर्मशब्दः धार्मिकक्रियाजनितगुणार्थे प्राप्यते –

"ऋतं सत्यं तपो राष्ट्रं श्रमो धर्मश्च कर्म च।
भूतं भविष्यदुच्छिष्टे वीर्यं लक्ष्मीर्बलं बले॥"[18]

एते धर्मस्य गुणाः निश्चितरूपेण मानवजीवनस्य तथा मानवसमाजस्य विकासस्य बीजरूपमस्ति। संहितातः अनन्तरं ब्राह्मणग्रन्थेष्वपि धर्मशब्दस्य प्रयोगो मिलति। तत्र ऐतरेयब्राह्मणे धर्मशब्दः सकलधार्मिककृत्येषु व्यवहृतः । यथा-

"धर्मस्य गोष्ठाजनीति तमभ्युत्कृष्टमेवं।

13 . मनुस्मृतिः, १/१०९
14 . ऋग्वेदः, १/१००/६३
15 . ऋग्वेदः, १०/२१/३
16 . ऋग्वेदः, १/२२/१८
17 . शुक्लयजुर्वेदः, ३१/१६
18 . अथर्ववेदः, ९/९/१७

विदभिषेश्यन्तेतथाचीऽभिमन्त्रयेत॥"[19]

"त्रयो धर्मस्कन्धा यज्ञोऽध्ययनं दानमिति। प्रथमस्तप एवेति द्वितीयो ब्रह्मचार्याचार्यकुलवासी तृतीयोऽन्यन्तमात्मानमाचार्यकुलेऽवसादयन्।"[20] तैत्तिरीयोपनिषदि अपि 'धर्मः' शब्दस्य प्रतिपादनमस्ति। तत्र शीक्षावल्ली नामके अध्याये उल्लिखितमस्ति – "सत्यं वद। धर्मं चर।" यानि अनवद्यानि कर्माणि तानि सेवितव्यानि। नो इतराणि।"[21] पुनः उक्तमस्ति – "मातृदेवो भव, पितृदेवो भव, आचार्यदेवो भव, अतिथिदेवो भव।"[22] अनेनोपदेशात्मकवाक्येन धर्मस्य प्रयोजनं कीदृशं आसीत् तदेव ज्ञातुं शक्यते ।

एवमेवासौ समयानुसारं परिवर्तितो भूत्वा अन्ते च मानवस्य विशेषाधिकारेषु, कर्तव्येषु, नियमेषु, आचारविधौ च प्रसिद्धो जातः।

**धर्मशास्त्रस्य महत्त्वप्रतिपादनम्**

'वेदोऽखिलधर्ममूलम्' इति मनुवचनमाश्रित्य वक्तुं शक्यते यत् वेदः सर्वासां विद्यानां मूलभूतः अर्थात् जननीस्वरूपम्। वेदवृक्षमाश्रित्य सर्वाणि शास्त्राणि प्रादुर्भवन्ति। वेदे एव मन्त्राः, ब्राह्मणानि, आरण्यकानि, उपनिषदः, षडङ्गानि सन्ति । एतेषु वेदाङ्गेषु कल्पभागे एव धर्मशास्त्रं आयाति। कल्पसूत्रं चतुर्विधम् – श्रौतसूत्रं, शुल्बसूत्रं, धर्मसूत्रं तथा गृह्यसूत्रं चेति। महाभारत-रामायणादिष्वपि मनुना प्रोक्तधर्मशास्त्रस्य बहूनि प्रमाणानि दृश्यन्ते। योगदर्शनस्य प्रणेता पतञ्जलिना यमशब्देन अस्यार्थः प्रदीयते – "अहिंसा सत्यास्तेयब्रह्मचर्यापरिग्रहा यमाः।"[23] पुनः- "शौचसन्तोषतपःस्वाध्यायेश्वरप्रणिधानानि नियमाः।"[24]

धर्मशास्त्रं मूलतः धर्मप्रतिपादकं शास्त्रम्। चतुर्षु पुरुषार्थेषु मध्ये धर्मः प्रधानः। धर्मशास्त्रस्य मुख्यतः पुरुषार्थचतुष्टयं वर्णितमस्ति। तेषु चतुर्षु पुरुषार्थेषु मार्गनिर्देशकरूपेण तथा नियन्त्रकरूपेण धर्मस्य प्रभावोऽतीवास्ति। धर्मशास्त्रस्य महत्त्वमेतदस्ति यत् जीवनस्य सर्वेषु कालेषु धर्मस्य प्रभावः साक्षात् परम्परया रूपेण प्रतिफलितः। धर्मेन स्थितजनाः सर्वप्रकारं सुखं लब्ध्वा परवर्तिजीवनमपि सुखमयं कुर्वन्ति। धर्मशास्त्राण्येव स्मृतय इति व्यवह्रियन्ते। वेदे निहिताः धर्माः

19 . ऐतरेयब्राह्मणम्, १/१५

20 . छान्दग्योपनिषद्, २/२३

21 . तैत्तिरीयोपनिषद्, २/२३

22 . तैत्तिरीयोपनिषदि, २/२५

23 . योगसूत्रं, २/३०

24 . योगसूत्रं, २/३२

परवर्तिकाले धर्मशास्त्ररूपेण स्मृताः। समाजस्य नैतिक-सामाजिक-बौद्धिक-आध्यात्मिककल्याणवर्धनार्थं तथा विभिन्नव्याधिदूरीकरणार्थं शास्त्रस्यास्य अतीव महत्त्वपूर्णा भूमिका अस्ति। मनु-हारित-याज्ञवल्क्य-विष्णु इत्यादयः विरचिताः स्मृतयः समाजशास्त्रस्य अद्वितीयकृतयः।

अस्माकं देशस्य प्राचीनैर्महर्षिभिः भूयो भूयोऽभिहितं यत् 'अहिंसा परमो धर्मः'। सर्वेषु सम्प्रदायेषु धर्मेषु वा अहिंसायाः महत्त्वं गुणागुणं च प्रकटीयते। हिंसा त्रिविधा – मानसिकी, कायिकी, वाचिकी। महाभारतेऽपि उक्तमस्ति – 'अहिंसा परमो धर्मः'। आचार्ययाज्ञवल्क्येनापि याज्ञवल्क्यस्मृतौ धर्मलक्षणप्रदानसमये अहिंसायाः स्थानं सर्वप्राथम्येन दत्तम्। धर्मस्य दशविधं लक्षणं यथा –

"अहिंसा सत्यमस्तेयं शौचमिन्द्रियनिग्रहः।
दानं धर्मो दया शान्तिः सर्वेषामधर्मसाधनम्॥"[25]

धर्मपालनमेव चतुर्णामाश्रमाणां मूलम्। धर्मपालनं ब्रह्मचर्याश्रमे मुख्यतया विहितम्। धर्मः रक्षितो रक्षकं रक्षति। यः धर्महानिं करोति धर्मोऽपि तं नाशयति। संसारे अस्मिन् मानवानां द्विविधा प्रवृत्तिः जायते – शास्त्रानुकूलव्यवहारो धर्मः, शास्त्रप्रतिकूलस्त्वधर्मः। धर्माश्रितजनानां श्रीर्वृद्धिर्भवति, अधर्मिजनानां श्रीर्ह्रासो भवति। वेदोक्तधर्मस्य महिमा पुराणादिषु तथा लौकिकसाहित्यशास्त्रेष्वपि दृश्यते। यतो हि उक्तं हितोपदेशे –

"आहारनिद्राभयमैथुनं च सामान्यमेतत् पशुभिर्नराणाम्।
धर्मो हि तेषामधिको विशेषो धर्मेण हीनाः पशुभिः समानाः॥"[26]

द्विविधः खलु धर्मः – प्रवृत्तिलक्षणः, निवृत्तिलक्षणश्च। उभयोरपि मूलं सदाचारः अस्ति। अतएव 'आचारः परमो धर्मः' एव। सतां सज्जनानामाचारः, सद्व्यवहारः, चरितं वा सदाचारः भवति। विष्णुपुराणे सदाचारस्य लक्षणमिदं कथितम् –

"साधवः क्षीणदोषाश्च सच्छब्दः साधुवाचकः।
तेषामाचरणं यत्तु सदाचारः स उच्यते॥"[27]

वस्तुतः धर्मस्य व्यावहारिकं लोकप्रियं नितान्तं च सार्थकं स्वरूपं सदाचार एव। य एव सदाचारी स एव परमधार्मिकः। सदाचारेण खलु मनुष्यः उन्नतेः चरमशिखरं गच्छति। अत एव ऋषिभिः समस्तवर्णेभ्यः सदाचारः अनिवार्यः प्रतिपादितः। चतुर्णामपि वर्णानामाचारश्चैव शाश्वतः।

25 . याज्ञवल्क्यस्मृतिः, १/१२२

26 . हितोपदेशः, २५

27 . विष्णुपुराणे,३/११/३

मानवजीवने तपसोऽपि महत्त्वं विद्यते। चरित्रमेव पुरुषस्य सर्वस्वम्। चरित्रक्षणैव मानवत्वं देवत्वं च। चरित्रं हि जीवनस्य सर्वस्वम्। चरित्रं हि आचारमाध्यमेन प्रतिफलितं भवति। शिष्टाचारः सदाचारो वा स्मृतिशास्त्रस्य धर्मशास्त्रस्य वा विषयः। यथा हि –

“यस्मिन् देशे य आचारः पारम्पर्यक्रमात्।
वर्णानां सान्तरालानां स सदाचार उच्यते॥”[28]

मानवजीवनस्य नैतिक-सामाजिक-राष्ट्रनैतिक-आध्यात्मिककल्याणेन सह धर्मशास्त्रस्य अविच्छेदात्मकं सम्बन्धमस्ति। पी. वी. काणे महोदयेन उक्तं तस्य ‘The History of Dharmasastra’ नामके ग्रन्थे -

“It is said by the sastrakaras that the vedas represent the first and foremost store house of Dharma, because they contain the eternal laws, which have been handed down from generation to generation by the Acharyas and seers for the benefit of mankind. In sharp contradistinction to the vedas there exist the smritisastras, containing the socio-political dogmas, framed by the society from time to time for guidance of the nation.”[29]

एवं वक्तुं शक्यते यत् धर्मशास्त्रे धर्मतथा कर्मविषयकं शास्त्रविहितकर्माणां वर्णनमुच्यते ।

**उपसंहारः**

धर्मशास्त्रं सदैव हि मानवकल्याणाय पथप्रदर्शकम्। धर्मो विश्वस्य जगतः प्रतिष्ठा। लोके धर्मिष्ठमुपसर्पन्ति। धर्मेण पापमपनुदन्ति। धर्मे सर्वं प्रतिष्ठितम्। तस्माद् धर्मं परमं वदन्ति। विश्ववासिनां जनानामभ्युदयश्रेयस्सिद्ध्यर्थं जगति विराजमानस्य धर्मस्य महती प्रतिष्ठा। धर्मशब्दः भारतीयानां प्राणभूतवेदस्य बहुत्र बह्वर्थेषु प्रयुक्तः। भारतीयाः सनातनधर्मं दृढं विश्वसन्ति। तदनुसारं वेद एव हिन्दुसंस्कृतेः प्राचीनप्रमाणरूपेण स्वीकृतः। भारतीयाः वेदानां नित्यत्वमपि विश्वसन्ति। यतः सोऽयं धर्मो वेदप्रतिपाद्यः इति वेद एव सर्वस्वं आस्तिकधुरन्धराणाम्। वैदिककाले नराः यज्ञैर्देवान् सन्तोष्य धर्ममार्गे प्रचलितवन्तः। ततस्तदानीं यज्ञ एव मुख्यधर्म आसीत्।

“धर्मा बहुविधा लोके श्रुतिभेदमुरवोद्भवाः।
देशधर्माश्च दृश्यन्ते कुलधर्मास्तथैव च॥

28 . मनुस्मृतिः, २/१२

29 . The History of Dharmasastra, vol. 4th page no. 231

जातिधर्मा वयोधर्मा गुणधर्माश्च शोभने।
शरीरकालधर्माश्च आपद्धर्मास्तथैव च॥
एतद् धर्मस्य नानात्वं क्रियते लोकवासिभिः॥"[30]

धर्मशास्त्रग्रन्थाः रचनाशैलीमनुसृत्य स्मृति-टीका-सूत्रादिभिः विभक्ताः सन्ति। याज्ञवल्क्यसंहितायामाचाराध्याये विंशतिसंख्यकाः धर्मशास्त्रकाराणां विषये उल्लेखः प्राप्यन्ते। एते स्मृतिशास्त्रकाराः- मनु, अत्रि, विष्णु, हारीत, याज्ञवल्क्य, उशना, अङ्गिरा, यम, आपस्तम्ब, संवर्त, कात्यायन, बृहस्पति, पराशर, व्यास, शङ्ख, लिखित, दक्ष, गौतम, शातातप तथा वसिष्ठः।

"मन्वत्रिविष्णुहारीतयाज्ञवल्क्योशनोऽङ्गिराः
यमापस्तम्बसंवर्ताः कात्यायनबृहस्पती ॥
पराशरव्यासशङ्खलिखिता दक्षगौतमौ ।
शातातपो वसिष्ठश्च धर्मशास्त्रप्रयोजकाः॥"[31]

स्मृतिशास्त्रस्य अथवा धर्मशास्त्रस्य क्रमविकासः रामायणे, महाभारते तथा पुराणादिशास्त्रेषु पूर्णप्रतिफलनं जातम्। मार्कण्डेयपुराणानुसारेण महाभारतमपि धर्मशास्त्ररूपेण कथितमस्ति –

"धर्मशास्त्रमिदं श्रेष्ठमर्थशास्त्रमिदं परम्।
कामशास्त्रमिदञ्चाग्रं मोक्षशास्त्रं तथोत्तमम्॥
चतुराश्रमधर्माणामाचारस्थितिसाधनम्॥"[32]

अर्थात् महाभारते अपि वर्णाश्रमधर्म, श्राद्ध, शुद्धि, विवाह, आचार, व्रत, दान, तीर्थ, प्रायश्चित्त, राजनीतिप्रश्नृतयः विषयाः अन्तर्भुक्ताः परिदृश्यन्ते । मत्स्यपुराणे एवं च कूर्मपुराणेषु श्रौतस्मार्तभेदेन धर्मः द्विधा विभक्तः। तत्र श्रौतधर्मः त्रिविधः- इष्टिः, पशुयागः, सोमयागश्चेति। बौधायनधर्मसूत्रे-अनुशासनपर्व-शान्तिपर्वादिषु च धर्मः वेदस्मृतिशिष्टाचारप्रतिपाद्यरूपेण त्रिधा वर्णितः। हेमाद्रिविज्ञानेश्वरादयः धर्मं भविष्यपुराणदृष्ट्या षोढा विभाजयन्ति यथा - वर्णधर्मः, आश्रमधर्मः, वर्णाश्रमधर्मः, गुणधर्मः, निमित्तधर्मः, साधारणधर्मश्च ।

१) इष्टिः - औषधिप्रधानयागः। २) पशुयागः - पशुयागे प्रधानतः पशुः। ३) सोमयागः - सोमयागे सोम एव सम्पद्यते। ४) वर्णधर्मः - ब्राह्मणो नित्यं सुरां विवर्जयेत्। ५) आश्रमधर्मः - ब्रह्मचारी नित्यं दण्डं गृह्णीयात्। ६) वर्णाश्रमधर्मः -ब्राह्मणो ब्रह्मचारी पलाशदण्डं गृह्णीयात्। ७) गुणधर्मः - राज्ञः

---

30 . पराशरधर्मसंहिता-माधवीयवृत्तिः, १/१७

31 . याज्ञवल्क्यस्मृतिः, १/४,५

32 . मार्कण्डेयपुराणम्, १/७/७

प्रजापालनम्। ८) निमित्तधर्मः - विहितस्याननुष्ठाने प्रतिषिद्धकर्मकरणे च प्रायश्चित्तम्। ९) साधारणधर्मः - अस्तेयाहिंसादयः।

धर्मार्थकाममोक्षश्रेयसेन चतुर्धा प्रतिपादिताः। अपौरुषेयस्य वेदस्यानुमापकतया स्मृत्यादीनामपि वेदानुकरणेन धर्मे प्रामाण्याद् धर्मशास्त्रं पुरुषार्थचतुष्टयस्य प्रमुखं प्रतिपादकम्। एतेषु पुरुषार्थचतुष्टयेषु धर्मस्य श्रेष्ठत्वं सर्वैः स्वीक्रियते । एतेषां धर्मार्थकामानां पुरुषार्थत्रयाणां विशुद्धाचरणे मोक्षप्राप्तिर्नाम चतुर्थः पुरुषार्थः सिद्धति। चतुर्वर्गेऽर्थकाममोक्षणां पुरुषार्थानां मूलो धर्मः। धर्मपालनं ब्रह्मचर्याश्रमे मुख्यतया विहितम्। गृहाश्रमे धर्म्यौपायेनार्थकामयोरज्जनं सेवनं च विहितम्। धर्मः रक्षितो रक्षकं रक्षति। यः धर्महानिं करोति धर्मोऽपि तं नाशयति।

**सन्दर्भग्रन्थाः**

*Svasastriyethasa : Nibandhasca*, National Sanskrit University Tirupati-517507.

कश्यप, किशोर केशव, *याज्ञवल्क्यस्मृतिः*, चौखम्बा कृष्णदास अकादमी, वाराणसी, २०२१.

काणे, डा. पी. वी., *धर्मशास्त्र का इतिहास*, चतुर्थभाग, उत्तरप्रदेश हिंदी संस्थान, लखनऊ

चट्टोपाध्याय, अध्यापक श्यामाप्रसाद, *प्राचीन भारतीय धर्मशास्त्रेर भूमिका*, संस्कृत बुक डिपो, कलकाता-७००००६, २००६

शर्मा, सत्यप्रकाश, *धर्मशास्त्र के मूल तत्त्व*, प्रथमखण्ड, नई भारतीय बुक कार्पोरेशन

शास्त्री, श्री, पं. हरगोविन्द, *मनुस्मृतिः*, चौखम्बा संस्कृत भवन, वाराणसी-१, वि.सं. २०७८

तैत्तिरीयोपनिषद्, गीताप्रेस, गोरखपुर,२००९